# Raja Indaradyumnakritam Vishnu Stotram

# રાજા ઇન્દરદ્યુમ્નકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Raja Indaradyumnakritam Vishnu Stotram

File name : rAjAindaradyumnakRRitaMviShNustotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 561/94-121||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# રાજા ઇન્દરદ્યુમ્નકૃતં વિષ્ણુસ્તોત્રમ્

રાજા વિષ્ણું પ્રતુષ્ટાવ સાષ્ટાઙ્ગં પ્રણિપત્ય ચ ।
કેશવં માધવં વિષ્ણું ગોવિન્દં મધુસૂદનમ્ ॥ ૯૪॥

પદ્મનાભં હૃષીકેશં શ્રીધરં ચ ત્રિવિક્રમમ્ ।
દામોદરં વાસુદેવં શ્રીહરિં કમ્ભરાસુતમ્ ॥ ૯૫॥

ગોપાલબાલં રાધેશં શ્રીશં રમેશ્વરં પ્રભુમ્ ।
અનાદિશ્રીકૃષ્ણનારાયણં શ્રીપુરુષોત્તમમ્ ॥ ૯૬॥

મઞ્જુલેશં પાર્વતીશં પ્રભેશં માણિકીપતિમ્ ।
લક્ષ્મીનારાયણં હંસાજયાનાથં નમામ્યહમ્ ॥ ૯૭॥

શઙ્ખચક્રગદાશાર્ઙ્ગવનમાલાવિભૂષણમ્ ।
લોકનાથં જગન્નાથં શ્રીનાથં પ્રણમામ્યહમ્ ॥ ૯૮॥

અક્ષરેશ ચ મુક્તેશ લલિતેશ નમોઽસ્તુ તે ।
અવતારેશ દેવેશ વ્યૂહેશ ચ નમોઽસ્તુ તે ॥ ૯૯॥

ઈશ્વરેશ ચ માયેશ દુર્ગેશ જાહ્નવીપતે ।
જીવેશાઽનન્તયજ્ઞેશ યજ્ઞાધિપ નમોઽસ્તુ તે ॥ ૧૦૦॥

વેદાત્મકાય કાન્તાય ધર્મપુત્રાય તે નમઃ ।
બ્રહ્મવ્રતધરાયાઽત્રિગુણાય ચ નમોઽસ્તુ તે ॥ ૧૦૧॥

પ્રકૃતીશાય શાન્તાય વૈકુણ્ઠસ્થાય તે નમઃ ।
નૃસિંહમત્સ્યવારાહકૂર્મરૂપાય તે નમઃ ॥ ૧૦૨॥

સાધુવેષધરાયાદિકારણાય ચ તે નમઃ ।
સહસ્રશિરસે વેદ્યપુરુષાય ચ તે નમઃ ॥ ૧૦૩॥

અસુરાણાં દમનાર્થં ધૃતરૂપાય તે નમઃ ।
હિરણ્યગર્ભરૂપાયાઽમૃતધામ્ને ચ તે નમઃ ॥ ૧૦૪॥

સર્વગર્ભાય કૃષ્ણાયાઽન્તરાત્મને ચ તે નમઃ ।
સ્રષ્ટ્રેઽવિત્રે ચ સંહર્ત્રે કાર્યરૂપાય તે નમઃ ॥ ૧૦૫॥

સર્વદિક્પાલરૂપાય લોકપાલાત્મને નમઃ ।
અર્ધનારીસ્વરૂપાય ત્રિદેવાય ચ તે નમઃ ॥ ૧૦૬॥

અનન્તાઽઽનન્દનિધયે બ્રહ્મધામ્ને ચ તે નમઃ ।
કર્મફલપ્રદાત્રે તે ચાઽન્તઃસ્થાય નમો નમઃ ॥ ૧૦૭॥

સૌરાષ્ટ્રકૃતવાસાય શ્રીકૃષ્ણાય પરાત્મને ।
કોટિગોપીકાન્ત તુભ્યં સુખદાય નમો નમઃ ॥ ૧૦૮॥

બ્રાહ્મતેજસે ક્ષત્રાણાં વીર્યરૂપાય તે નમઃ ।
વિશાં સમ્પત્સ્વરૂપાય શરણ્યાય ચ તે નમઃ ॥ ૧૦૯॥

પાતિવ્રત્યસ્વરૂપાય પત્નીવૃષાય તે નમઃ ।
સદોર્ધ્વરેતસે કૃષ્ણ મોક્ષદાય ચ તે નમઃ ॥ ૧૧૦॥

સાધુષુ સર્વદા સ્થાત્રે બાલરૂપાય તે નમઃ ।
નમો ભક્તમનઃકામપૂરકાય નમો નમઃ ॥ ૧૧૧॥

જ્ઞાનદાય તથેચ્છાસમ્પ્રદાય યત્નદાય ચ ।
ક્રિયાદાત્રે ફલદાત્રે ભોક્ત્રે ભોગ્યાય તે નમઃ ॥ ૧૧૨॥

પ્રકાશાય પરેશાય જીવસ્થાય ચ તે નમઃ ।
સર્વદેહિનિવાસાય શક્તિયોગ્યાય તે નમઃ ॥ ૧૧૩॥

અચિન્ત્યગુણધામ્ને તે દિવ્યદેહાય તે નમઃ ।
અપારૈશ્વર્યધાત્રે તે દૃશ્યરૂપાય તે નમઃ ॥ ૧૧૪॥

અદૃશ્યરૂપરૂપાય નિત્યજ્ઞાય ચ તે નમઃ ।
સર્વતત્ત્વસ્વરૂપાય મણ્ડપાય ચ તે નમઃ ॥ ૧૧૫॥

પઞ્ચાગ્નિકૃતરૂપાય વ્રતસ્થાય ચ તે નમઃ ।
પુણ્યદાય મહેશાય સર્વેશાય ચ તે નમઃ ॥ ૧૧૬॥

સર્વદુઃખવિનાશિત્રે વહ્નિરૂપાય તે નમઃ ।
નમોઽસ્તુ સ્રુક્સ્રુવાદ્યાત્મયજ્ઞપાત્રાય તે નમઃ ॥ ૧૧૭॥

દક્ષિણાપતયે તુભ્યં ચાશીર્વાદાય તે નમઃ ।
તૃપ્તયે શાન્તિરૂપાય રસરૂપાય તે નમઃ ॥ ૧૧૮॥

સર્વેન્દ્રિયનિવાસાય સત્યકામાય તે નમઃ ।
આદિત્યાદિસ્વરૂપાય વૃષરૂપાય તે નમઃ ॥ ૧૧૯॥

નમસ્કારસ્ય પાત્રાયાઽર્પણપાત્રાય તે નમઃ ।
ત્વત્પ્રસાદાત્ કૃપાસિન્ધો યજ્ઞસિદ્ધિર્મમાઽભવત્ ॥ ૧૨૦॥

કરં ગૃહાણ મે વિષ્ણો યથા પત્નીકરં વરઃ ।
દેહિ મે ચરણે વાસં નાન્યં વૃણોમિ કેશવ! ॥ ૧૨૧॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને પ૬૧-અધ્યાયાન્તર્ગતં
રાજા ઇન્દરદ્યુમ્નકૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૫૬૧/૯૪-૧૨૧॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 561/94-121..

Proofread by PSA Easwaran

*Raja Indaradyumnakritam Vishnu Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*